॥ श्री रंगनाथाय नमः ॥
। अथ प्राकारप्रदक्षिणविधिः ॥

गरुड उवाच –
भगवन्सर्वलोकेश कृपालो कमलासन ।
श्रुतं मया त्वन्मुखाब्जात्तीर्थानां वैभवं शुभं ।
पुनरेव तु पृच्छामि प्रदक्षिणविधिं विधे ।

ब्रह्मोवाच –
विष्णुवाह प्रवक्ष्यामि श्रुणु रंगेशवैभवं । २ ।
विमानं रंगनाथस्य माहात्म्यं च तथा श्रुणु ।
कावेर्या मध्यभागे तु चंद्रपुष्करिणीतटे । ३ ।
चतुर्दिशं चतुर्द्वारं तस्य देवालयस्य च ।
आभिमुक्ये रंगधाम्नो द्वारमेकं विशिष्यते । ४ ।
मोक्षार्थी पापनिर्हारी प्रदक्षिणमथाचरेत् ।
तां दिशं तु समारभ्य रंगनाथं प्रणम्य च । ५ ।
विष्वक्सेन महाबाहो अनुज्ञां दातुमर्हसि ।
प्रदक्षिणार्थं देवस्य त्वां नमामि पुनः पुनः । ६ ।
पक्षींद्रानेन मंत्रेण प्रणम्य तदनुज्ञया ।
दिक्पालाय च कालाय जयाय विजयाय च । ७ ।
वासुदेवाय श्रीभूम्यां चतुर्व्यूहाय शांङ्गिणे ।
शत्तयादि द्वादशभ्यश्च आत्मादि ब्रह्मरूपिणे ।८।
नमस्कृत्य च सर्वेभ्यो नैतृती दिशमाव्रजेत् ।
तत्कोणाधिपतिं देवं कुमुदं कुमुदाक्षरं । ९ ।
रंगेशं च प्रणम्याथ प्रतीचीं दिशमाव्रजेत् ।
ततः पर्जन्यदिक्पालमूर्तये ब्रह्मणे तथा । १० ।
पुष्कराय च कालाय पुष्कराक्षाय ते नमः ।
ततो वायुदिशं गत्वा तत्कोणे वायवे नमः । ११ ।

गरुडाय च दुर्गायै सरस्वत्यै ह्रियै नमः ।
उत्तरद्वारि पक्षींद्र रंगेशं प्रणमेत् बुधः ।१२ ।
दिक्पालाय कुबेराय गणाधिपतये तथा।
शांङ्गिणे वासुदेवाय श्रीनिवासाय वै नमेत् । १३ ।
तत ईशानदिग्भाग ईशानं प्रणमेच्च वै ।
इंद्रचंद्रमसं चैव बलं च प्रबलं तथा। १४ ।
रंगेशं च नमो ब्रह्मण् सर्वाभीष्टप्रदायं ।
ततः पूर्वदिशं गत्वा तत्कोणे द्वारि वै नमेत् । १५ ।
दिक्पालाय सुरेंद्राय नंदाय च सुनंदाय च ।
हयशीर्ष्णे नृसिंहाय प्रणमेत्यपक्षिणां वर । १६ ।
तत आग्नेयकोणे तु अग्नये प्रणमेत् बुधः ।
गरुडाय नमेद्देव ईशानाय नमेत्तथा । १७ ।
अश्विभ्यां पद्मनाभाय क्रमेण प्रणमेद् बुधः ।
ततो दक्षिणादिग्भागे यमाय प्रणमेदथ । १८ ।
कीर्त्यै स्फूर्त्यै च मायायै रामाय प्रणमेत्तथा ।
विभीषणाय च नमेदेवं वै प्रणमेद् बुधः । १९ ।
पूर्ववत्सन्निधिं गत्वा तत्प्रीत्यै च समर्पयेत् ।
ततोंऽतः प्रविशेत् प्राज्ञ अभिवादनपूर्वकं । २० ।
पूर्वोक्तेन क्रमेणैव गत्वा तत्र हरिं स्मरण् ।
द्वात्रिंशत्संख्यया देवं नमस्कुर्यात्तु नामभिः । २१ ।
ततोंऽतः प्रविशेद्देशं पूर्ववत्प्रणमेद् बुधः ।
चतुर्दिशं प्रणम्यैवं रंगेशं वीक्ष्य वार्घ्य च । २२ ।
पूजयित्वा तयाअशक्ति गंधमाल्यानुलेपनैः ।
आचार्य पूजयेद्भक्तया वस्त्रगंधानुलेपनै : । २३ ।
नूत्नं वस्त्रं प्रदातव्यं पित्रुणां तृप्तयेंऽडज।
जीर्णवस्त्रप्रदानेन पितरो यांत्यसद्गतिं । २४ ।
उदकुंभः प्रदातव्यो देवर्षिपितृतृप्तये।
सुवर्णस्य प्रदानेन गयाश्राद्धफलं भवेत् । २५ ।

सुमंगल्यैस्सूर्पयुग्मं दध्यान्मांगल्यसिद्धये ।
कुटुंबिनं भोजयीत ब्राह्मणं शोत्रियं शुचिः । २६ ।
सप्तावरान् ब्राह्मणांश्च भोजयेद्भक्तिपूर्वकं ।
रात्रौ स्वपेद्भूमितले ब्रह्मचर्यव्रतं चरन् । २७ ।
एवं कृते पक्षिराज संपूर्ण फलमश्नुते ।
सर्वयज्ञेषु यत्पुण्यं सर्वतीर्थेषु यत्फलं । २८ ।
सर्वदानेषु यत्पुण्यं तत्पलं भवति धृवं ।
पक्षांते विष्णुनक्षत्रे एकादश्यां च वैधृतौ । २९ ।
जन्मर्क्षौ यमनक्षत्रे पितृणां च दिने तथा ।
विशेषेण तुलामासे मृगोवारि तथांडज । ३० ।
प्रदक्षिणं तु यः कुर्यान्मृत्युपाशात्स मुच्यते ।
सप्तसागरपर्यंत सप्तद्वीपवतीभुवः । ३१ ।
प्रदक्षिणेन यत्पुण्यं तत्पुण्यफलमाप्नुयात् ।
विद्याकामो लभेद्विद्यां धनकामो लभेद्धनं । ३२ ।
पुष्टिकामो लभेत्पुष्टिं श्रीकामः श्रियमाप्नुयात् ।
कन्याकामो लभेत्कन्यां राज्यकामस्तु राज्यवान् । ३३ ।
प्रदक्षिणादिकालेषु मौनी रंग स्मरेद् ध्रुवं ।
भुत्तवा न गच्छेत्सायांहे मध्याह्ने नापराह्नके । ३४ ।
दुष्टसंगतिदुवृत्तदुर्लापजनार्जितः ।
जलहस्तः स्वयं कुर्याद्वाचा ब्रह्म शनैर्वदन् । ३५ ।
न शूद्रभाषणं कुर्यान्नोछिचष्ठं स्वपदा स्प्रुशेत् ।
प्राकाराणां भृगोवारि सपत्नीकः प्रदक्षिणं । ३६ ।
यः करोति स आप्नोति स्वर्ग मोक्षं सुखानि च ।
किमन्यदिच्चसि श्रोतु तत्सर्व वद सांप्रतं । ३७ ।

॥ इति गारुडपुराणे श्रीरंगनाथप्राकारप्रदक्षिणविधिः ॥

॥ ಶ್ರೀ ರಂಗನಾಥಾಯ ನಮ: ॥

। ಅಥ ಪ್ರಾಕಾರಪ್ರದಕ್ಷಿಣವಿಧಿ: ॥

ಗರುಡ ಉವಾಚ –

ಭಗವನ್ಸರ್ವಲೋಕೇಶ ಕೃಪಾಲೋ ಕಮಲಾಸನ ।
ಶ್ರುತಂ ಮಯಾ ತ್ವನ್ಮುಖಾಬ್ಜಾತ್ತೀರ್ಥಾನಾಂ ವೈಭವಂ ಶುಭಂ ।
ಪುನರೇವ ತು ಪೃಚ್ಛಾಮಿ ಪ್ರದಕ್ಷಿಣವಿಧಿಂ ವಿಧೇ ।

ಬ್ರಹ್ಮೋವಾಚ –

ವಿಷ್ಣುವಾಹ ಪ್ರವಕ್ಷ್ಯಾಮಿ ಶ್ರುಣು ರಂಗೇಶವೈಭವಂ । ೨ ।
ವಿಮಾನಂ ರಂಗನಾಥಸ್ಯ ಮಾಹಾತ್ಮ್ಯಂ ಚ ತಥಾ ಶ್ರುಣು ।
ಕಾವೇರ್ಯಾ ಮಧ್ಯಭಾಗೇ ತು ಚಂದ್ರಪುಷ್ಕರಿಣೀತಟೇ । ೩ ।
ಚತುರ್ದಿಶಂ ಚತುರ್ದ್ವಾರಂ ತಸ್ಯ ದೇವಾಲಯಸ್ಯ ಚ ।
ಆಭಿಮುಖ್ಯೇ ರಂಗಧಾಮ್ನೋ ದ್ವಾರಮೇಕಂ ವಿಶಿಷ್ಯತೇ । ೪ ।
ಮೋಕ್ಷಾರ್ಥೀ ಪಾಪನಿರ್ಹಾರೀ ಪ್ರದಕ್ಷಿಣಮಥಾಚರೇತ್ ।
ತಾಂ ದಿಶಂ ತು ಸಮಾರಭ್ಯ ರಂಗನಾಥಂ ಪ್ರಣಮ್ಯ ಚ । ೫ ।
ವಿಷ್ವಕ್ಸೇನ ಮಹಾಬಾಹೋ ಅನುಜ್ಞಾಂ ದಾತುಮರ್ಹಸಿ ।
ಪ್ರದಕ್ಷಿಣಾರ್ಥಂ ದೇವಸ್ಯ ತ್ವಾಂ ನಮಾಮಿ ಪುನ: ಪುನ: । ೬ ।
ಪಕ್ಷೀಂದ್ರಾನೇನ ಮಂತ್ರೇಣ ಪ್ರಣಮ್ಯ ತದನುಜ್ಞಯಾ ।
ದಿಕ್ಪಾಲಾಯ ಚ ಕಾಲಾಯ ಜಯಾಯ ವಿಜಯಾಯ ಚ । ೭ ।
ವಾಸುದೇವಾಯ ಶ್ರೀಭೂಮ್ಯಾಂ ಚತುರ್ವ್ಯೂಹಾಯ ಶಾಂರ್ಜ್ಗಿಣೇ ।
ಶಕ್ತ್ಯಾದಿ ದ್ವಾದಶಭ್ಯಶ್ಚ ಆತ್ಮಾದಿ ಬ್ರಹ್ಮರೂಪಿಣೇ ।೮।
ನಮಸ್ಕೃತ್ಯ ಚ ಸರ್ವೇಭ್ಯೋ ನೈರೃತೀ ದಿಶಮಾವ್ರಜೇತ್ ।
ತತ್ಕೋಣಾಧಿಪತಿಂ ದೇವಂ ಕುಮುದಂ ಕುಮುದಾಕ್ಷರಂ । ೯ ।
ರಂಗೇಶಂ ಚ ಪ್ರಣಮ್ಯಾಥ ಪ್ರತೀಚೀಂ ದಿಶಮಾವ್ರಜೇತ್ ।
ತತ: ಪರ್ಜನ್ಯದಿಕ್ಪಾಲಮೂರ್ತಯೇ ಬ್ರಹ್ಮಣೇ ತಥಾ । ೧೦ ।
ಪುಷ್ಕರಾಯ ಚ ಕಾಲಾಯ ಪುಷ್ಕರಾಕ್ಷಾಯ ತೇ ನಮ: ।
ತತೋ ವಾಯುದಿಶಂ ಗತ್ವಾ ತತ್ಕೋಣೇ ವಾಯುವೇ ನಮ: । ೧೧ ।
ಗರುಡಾಯ ಚ ದುರ್ಗಾಯೈ ಸರಸ್ವತ್ಯೈ ಹಿಯೈ ನಮ: ।
ಉತ್ತರದ್ವಾರಿ ಪಕ್ಷೀಂದ್ರ ರಂಗೇಶಂ ಪ್ರಣಮೇತ್ ಬುಧ: ।೧೨ ।
ದಿಕ್ಪಾಲಾಯ ಕುಬೇರಾಯ ಗಣಾಧಿಪತಯೇ ತಥಾ ।
ಶಾಂರ್ಜ್ಗಿಣೇ ವಾಸುದೇವಾಯ ಶ್ರೀನಿವಾಸಾಯ ವೈ ನಮೇತ್ । ೧೩ ।
ತತ ಈಶಾನದಿಗ್ಭಾಗ ಈಶಾನಂ ಪ್ರಣಮೇಚ್ಚ ವೈ ।

ಇಂದ್ರಚಂದ್ರಮಸಂ ಚೈವ ಬಲಂ ಚ ಪ್ರಬಲಂ ತಥಾ । ೧೪ ।
ರಂಗೇಶಂ ಚ ನಮೋ ಬ್ರಹ್ಮಣ್ ಸರ್ವಾಭೀಷ್ಟಪ್ರದಾಯಂ ।
ತತ: ಪೂರ್ವದಿಶಂ ಗತ್ವಾ ತತ್ಕೋಣೇ ದ್ವಾರಿ ವೈ ನಮೇತ್ । ೧೫ ।
ದಿಕ್ಪಾಲಾಯ ಸುರೇಂದ್ರಾಯ ನಂದಾಯ ಚ ಸುನಂದಾಯ ಚ ।
ಹಯಶೀರ್ಷ್ಣೆ ನೃಸಿಂಹಾಯ ಪ್ರಣಮೇತ್ಯಪಕ್ಷಿಣಾಂ ವರ । ೧೬ ।
ತತ ಆಗ್ರೇಯಕೋಣೇ ತು ಅಗ್ರಯೇ ಪ್ರಣಮೇತ್ ಬುಧ: ।
ಗರುಡಾಯ ನಮೇದ್ದೇವ ಈಶಾನಾಯ ನಮೇತ್ತಥಾ । ೧೭ ।
ಅಶ್ವಿಭ್ಯಾಂ ಪದ್ಮನಾಭಾಯ ಕ್ರಮೇಣ ಪ್ರಣಮೇದ್ ಬುಧ: ।
ತತೋ ದಕ್ಷಿಣಾದಿಗ್ಭಾಗೇ ಯಮಾಯ ಪ್ರಣಮೇದಥ । ೧೮ ।
ಕೀರ್ತ್ಯೈ ಸ್ಫೂರ್ತ್ಯೈ ಚ ಮಾಯಾಯೈ ರಾಮಾಯ ಪ್ರಣಮೇತ್ತಥಾ ।
ವಿಭೀಷಣಾಯ ಚ ನಮೇದೇವಂ ವೈ ಪ್ರಣಮೇದ್ ಬುಧ: । ೧೯ ।
ಪೂರ್ವವತ್ಸನ್ನಿಧಿಂ ಗತ್ವಾ ತತ್ಪ್ರೀತ್ಯೈ ಚ ಸಮರ್ಪಯೇತ್ ।
ತತೋಽಂತ: ಪ್ರವಿಶೇತ್ ಪ್ರಾಜ್ಞ ಅಭಿವಾದನಪೂರ್ವಕಂ । ೨೦ ।
ಪೂರ್ವೋಕ್ತೇನ ಕ್ರಮೇಣೈವ ಗತ್ವಾ ತತ್ರ ಹರಿಂ ಸ್ಮರಣ್ ।
ದ್ವಾತ್ರಿಂಶತ್ಸಂಖ್ಯಯಾ ದೇವಂ ನಮಸ್ಕುರ್ಯಾತ್ತು ನಾಮಭಿ: । ೨೧ ।
ತತೋಽಂತ: ಪ್ರವಿಶೇದ್ದೇಶಂ ಪೂರ್ವವತ್ಪ್ರಣಮೇದ್ ಬುಧ: ।
ಚತುರ್ದಿಶಂ ಪ್ರಣಮ್ಯೈವಂ ರಂಗೇಶಂ ವೀಕ್ಷ್ಯ ವಾರ್ಪ್ಯ ಚ । ೨೨ ।
ಪೂಜಯಿತ್ವಾ ತಯಾಅಶಕ್ತಿ ಗಂಧಮಾಲ್ಯಾನುಲೇಪನೈ: ।
ಆಚಾರ್ಯ ಪೂಜಯೇದ್ಭತ್ತ್ಯಾ ವಸ್ತ್ರಗಂಧಾನುಲೇಪನೈ : । ೨೩ ।
ನೂತ್ನಂ ವಸ್ತ್ರಂ ಪ್ರದಾತವ್ಯಂ ಪಿತ್ರುಣಾಂ ತೃಪ್ತಯೇಽಂಡಜ।
ಜೀರ್ಣವಸ್ತ್ರಪ್ರದಾನೇನ ಪಿತರೋ ಯಾಂತ್ಯಸದ್ಗತಿಂ। ೨೪ ।
ಉದಕುಂಭ: ಪ್ರದಾತವ್ಯೋ ದೇವರ್ಷಿಪಿತೃತೃಪ್ತಯೇ।
ಸುವರ್ಣಸ್ಯ ಪ್ರದಾನೇನ ಗಯಾಶ್ರಾದ್ಧಫಲಂ ಭವೇತ್ । ೨೫ ।
ಸುಮಂಗಲ್ಯೈಸ್ಸೂರ್ಪಯುಗ್ಮಂ ದಧ್ಯಾನ್ಮಾಂಗಲ್ಯಸಿದ್ಧಯೇ ।
ಕುಟುಂಬಿನಂ ಭೋಜಯೀತ ಬ್ರಾಹ್ಮಣಂ ಶೋತ್ರಿಯಂ ಶುಚಿ: । ೨೬ ।
ಸಪ್ತಾವರಾನ್ ಬ್ರಾಹ್ಮಣಾಂಶ್ಚ ಭೋಜಯೇದ್ಭಕ್ತಿಪೂರ್ವಕಂ ।
ರಾತ್ರೌ ಸ್ವಪೇದ್ಭೂಮಿತಲೇ ಬ್ರಹ್ಮಚರ್ಯವ್ರತಂ ಚರನ್ । ೨೭ ।
ಏವಂ ಕೃತೇ ಪಕ್ಷಿರಾಜ ಸಂಪೂರ್ಣ ಫಲಮಶ್ರುತೇ ।
ಸರ್ವಯಜ್ಞೇಷು ಯತ್ಪುಣ್ಯಂ ಸರ್ವತೀರ್ಥೇಷು ಯತ್ಫಲಂ । ೨೮ ।
ಸರ್ವದಾನೇಷು ಯತ್ಪುಣ್ಯಂ ತತ್ಫಲಂ ಭವತಿ ಧೃವಂ ।
ಪಕ್ಷಾಂತೇ ವಿಷ್ಣುನಕ್ಷತ್ರೇ ಏಕಾದಶ್ಯಾಂ ಚ ವೈಧೃತೌ । ೨೯ ।

ಜನ್ಮರ್ಕ್ಷೇ ಯಮನಕ್ಷತ್ರೇ ಪಿತೃಣಾಂ ಚ ದಿನೇ ತಥಾ ।
ವಿಶೇಷೇಣ ತುಲಾಮಾಸೇ ಮೃಗೋವಾರಿ ತಥಾಂಡಜ । ೩೦ ।
ಪ್ರದಕ್ಷಿಣಂ ತು ಯ: ಕುರ್ಯಾನ್ಮೃತ್ಯುಪಾಶಾತ್ಸ ಮುಚ್ಯತೇ ।
ಸಪ್ತಸಾಗರಪರ್ಯಂತ ಸಪ್ತದ್ವೀಪವತೀಭುವ: । ೩೧ ।
ಪ್ರದಕ್ಷಿಣೇನ ಯತ್ಪುಣ್ಯಂ ತತ್ಪುಣ್ಯಫಲಮಾಪ್ನುಯಾತ್ ।
ವಿದ್ಯಾಕಾಮೋ ಲಭೇದ್ವಿದ್ಯಾಂ ಧನಕಾಮೋ ಲಭೇದ್ಧನಂ । ೩೨ ।
ಪುಷ್ಟಿಕಾಮೋ ಲಭೇತ್ಪುಷ್ಟಿಂ ಶ್ರೀಕಾಮ: ಶ್ರಿಯಮಾಪ್ನುಯಾತ್ ।
ಕನ್ಯಾಕಾಮೋ ಲಭೇತ್ಕನ್ಯಾಂ ರಾಜ್ಯಕಾಮಸ್ತು ರಾಜ್ಯವಾನ್ । ೩೩ ।
ಪ್ರದಕ್ಷಿಣಾದಿಕಾಲೇಷು ಮೌನೀ ರಂಗ ಸ್ಮರೇದ್ ಧ್ರುವಂ ।
ಭುಕ್ತ್ವಾ ನ ಗಚ್ಛೇತ್ಸಾಯಾಂಹೇ ಮಧ್ಯಾಹ್ನೇ ನಾಪರಾಹ್ಣಕೇ । ೩೪ ।
ದುಷ್ಟಸಂಗತಿದುರ್ವೃತ್ತದುರ್ಲಾಪಜನಾರ್ಜಿತ: ।
ಜಲಹಸ್ತ: ಸ್ವಯಂ ಕುರ್ಯಾದ್ವಾಚಾ ಬ್ರಹ್ಮ ಶನೈರ್ವದನ್ । ೩೫ ।
ನ ಶೂದ್ರಭಾಷಣಂ ಕುರ್ಯಾನ್ನೋಚ್ಛಿಷ್ಟಂ ಸ್ವಪದಾ ಸ್ಪ್ರುಶೇತ್ ।
ಪ್ರಾಕಾರಾಣಾಂ ಭೃಗೋವಾರಿ ಸಪತ್ನೀಕ: ಪ್ರದಕ್ಷಿಣಂ । ೩೬ ।
ಯ: ಕರೋತಿ ಸ ಆಪ್ನೋತಿ ಸ್ವರ್ಗ ಮೋಕ್ಷಂ ಸುಖಾನಿ ಚ ।
ಕಿಮನ್ಯದಿಚ್ಛಸಿ ಶ್ರೋತು ತತ್ಸರ್ವ ವದ ಸಾಂಪ್ರತಂ । ೩೭ ।

॥ ಇತಿ ಗಾರುಡಪುರಾಣೇ ಶ್ರೀರಂಗನಾಥಪ್ರಾಕಾರಪ್ರದಕ್ಷಿಣವಿಧಿ: ॥